CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.

Coll. No. 908

Title Rāmarakṣyā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 908 Subject: Stotra.

Title: Rāmaraksyā

Author: – Scribe: –

Date of the work: – Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 6.9" by 3.9" Extent: 5 foll.

Language: Sanskrit Script: Devanāgari

Remarks: –

॥श्रीरामायनमः॥ ॥चरितंरघुनाथस्यश
तकोटिप्रविस्तरं एकैकमक्षरंपुंसांमहापातकना
शनं १ ध्यात्वानिलोत्पलश्यामंरामंराजीवलोच
नं जानकीलक्ष्मणोपेतंजटामुकुटमंडीतं २ सा
सीतूणधनुर्बाणपाणिंनक्तंचरांतकं स्वलील
याजगत्रातुमाविर्भूतमजंप्रभुं ३ रामरक्षांपठे
त्प्राज्ञःपापघ्नींसर्वकामदां शिरोमेराघवःपातुभा

रा०र०
२

लंदशरथात्मजः ४ कौशल्येयोदृशःपातुविश्वामित्रप्र
यश्रुतिः घ्राणंपातुमखत्राता मुखंसौमित्रिवत्सलः
५ जिह्वांविद्यानिधिःपातुकंठंभरतवंदितः स्कंधौ
दिव्यायुधःपातुभुजौभग्नेशकार्मुकः ६ करौसीता
पतिःपातुहृदयंजामदग्न्यजित् मध्यंपातुखरध्वं
सीनाभिंजांबवदाश्रयः ७ सुग्रीवेशःकटीपातुसक
थिनीहनुमत्प्रभुः ऊरूरघूत्तमःपातुरक्षःकुलविना

शकः ८ जानुनीसेतुकृत्पातुजंघेदशमुखांतकः
पादौविभीषणश्रीदःपातुरामोखिलंवपुः ९ एतां
रामबलोपेतांरक्षांयःसुकृतीपठेत् सचिरायुःसुखी
पुत्रीविजयीविनयीभवेत् १० पातालभूतल
व्योमचारिणःछद्मचारिणः नद्रष्टुमपिशक्तास्ते
रक्षितंरामनामभिः ११ रामेतिरामभद्रेतिरामचं
द्रेतिवास्मरन् नरोनलिप्यतेपापैःभुक्तिंमुक्तिंच
विंदति १२ जगज्जैत्रैकमंत्रेणरामनाम्नाभिरक्षि

रामः ते लिखित्वा धारयेद्यस्तु करस्थास्सर्वसिद्धिदः १३ व
२ ज्रपंजरनामेदं यो रामकवचं पठेत् अव्याहताज्ञः
सर्वत्र लभते जयमंगलं १४ आदिष्टवान्यथा
स्वप्ने रामरक्षामिमां हरिः तथा लिखितवान्प्रातः
प्रबुद्धो कौशिको मुनिः १५ आरामः कल्पवृक्षाणां
विरामः सकलापदां अभिरामस्त्रिलोकानां रा
मः श्रीमान् स नः प्रभुः १६ दक्षिणे लक्ष्मणो यस्य वा
मे च जनकात्मजा पुरतो मारुतिर्यस्तं वंदे र २

घुनंदनं १७ कूजंतं रामरामेति मधुरं मधुराक्षरं
आरुह्य कविताशाखां वंदे वाल्मिककोकिलं १
८ तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ पुंडरीक
विशालाक्षौ चीरकृष्णाजिनांबरौ १९ फलमूला
शिनौ दांतौ तापसौ ब्रह्मचारिणौ पुत्रौ दशरथस्यै
तौ भ्रातरौ रामलक्ष्मणौ २० शरण्यौ सर्वसत्वानां
श्रेष्ठौ सर्वधनुष्मतां रक्षःकुलनिहंतारौ त्रायेतां
नो रघूत्तमौ २१ सन्नद्धः कवची खड्गी चापबाणधरो

राम: धरोउचा गछन्मनोरथस्माकरामःपातुसलक्ष्मण
३ ः २२ रामोदाशरथीःशूरोलक्ष्मणानुचरोवलिः का
कुत्स्थपुरुषःपुर्णाकौशल्येयोरघुत्तमः २३ वेदान
तवेद्योयज्ञेशःपुराणपुरुषोत्तमः जानकीवल्लभ
ःश्रीमानन:अप्रमेयःपराक्रमः २४ इत्येतानिजपे
न्नित्यंमद्भक्तःश्रद्धयान्वितः अश्वमेधायुतपु
ण्यसंप्राप्नोतिनसंशयः २५ आपदामपहर्ता
रंसर्वसंपदा लोकाभिरामंश्रीरामंभूयोभूयोन ३

माम्यहं २६ लोकाभिराममरणरंगधीरराजीवने
त्रंरघुवंशनाथं कारुण्यरूपंकरुणाकरंतंश्रीरा
मचंद्रंशरणंप्रपद्ये २७ आत्तःसज्जधनुषावि
षुस्पृशावक्षयाशुगनिसंगसंगीनौरक्षणायमम
रामलक्ष्मणावग्रतःपथिसदैवगछतां २८ संग्रा
मपतिवलौरामोलक्ष्मणश्चमहाबलः राज्यजयति
सुग्रीवोराघवेणानुवालिनः २९ रामंलक्ष्मणपुर्वजं
रघुवरंसीतापतिंसुंदरंकाकुत्स्थंकरुणाकरंगुणानि

राम: ध्विप्रप्रियधार्मिकं राजेंद्रंसत्यसंधंदशरथतनयं
६ श्यामलं शांतमूर्तिं वंदेलोकाभिरामंरघुवरतिलकं
राघवंरावणारिं ३० धन्यायोदशरथनृपःसाच
माताचधन्या धन्योवंशोरघुकुलनवःयत्ररामा
वतार: ३१ धन्यावाणी कविवरमुखेरामनामप्रप
न्नाधन्योलोकःप्रतिदिनमसौरामवृत्तंशृणोति
३२ श्रीरामचंद्ररघुनंदनरामरामश्रीरामरामभरता
ग्रजरामरामः श्रीरामरामरणकर्कशरा ६

मरामः श्रीराम रामशरणंभवरामरामः ३३ वि
शालनेत्रंपरिपूर्णगात्रंसीताकलत्रंसुरवैरि
घातं जगत्पवित्रंपरमार्थतत्त्वंश्रीरामचंद्रंश
रणंप्रपद्ये ३४ रामायरामभद्रायरामचंद्राय
वेधसे रघुनाथायनाथायसीतायाःपतयेनम
नमः ३५ अग्रतःश्रीनृसिंहोमेपृष्ठतोदेवकी
सुतः उभयोःपार्श्वयोरक्षतांभ्रातरौरामल
क्ष्मणौ ३६ रामरामेतिरामेतिरमेरामेमनोर

रामः मे सहस्रनामततुल्यंरामनामवरानने ३७

५

इतिश्रीरामरक्षास्तंपूर्णसमाप्तः॥ ॥ ५